निविद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठांतेनमउक्तिंविधेम। नुम्। अग्निं। यज। भू॰ये४हे। अग्निमयेतत्पारय
नव्यो अस्मान्स्वस्तिभिरतिदुर्गाणिविश्वा। पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनयायशंयोः। वौ४॰। नुसोमा
य। अनुब्रू४हि। त्वंसोमप्रचिकितोमनीषात्वंरजिष्ठमनुनेषिपंथा॥ तवप्रणीतीपितरोनइंदोदेवेषुरत्नम
भजंतधीराः। नुम्। सोमंपातेधामानिहविषायजंतितातेविश्वापरिभूरस्तुयज्ञं॥ गयस्फानःप्रतरणःसुवीरो
वीरहाप्रचरासोमदुर्यान्। वौ४। नु। सवित्रे। अनु॰। तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि। धियोयोनःप्रचो
दयात्। नुम्। सवितारं। यज। भू॰ये४हे। सवितारंयइमाविश्वाजातान्याश्रावयतिश्लोकेन। प्रचसुवातिसवि
ता। वौ४। नु। अदित्यै। अनु। सुत्रामाणंपृथिवींद्यामनेहसंसुशर्माणमदितिंसुप्रणीतिं। दैवीनावंस्वरित्राम
नागसमस्रवंतीमारुहेमास्वस्तये। नुं। अदितिं। यज। भू॰ये४हे। अदितिंमहीमूषुमातरंसुव्रतानामृतस्यपत्नीम
वसेहुवेम। तुविक्षत्रामजरंतीमुरूचींसुशर्माणमदितिंसुप्रणीतिं। वौ४। नु। अग्नादिस्विष्टकृते दानकाज्ञेप्र
ज्ञोताषोश्चायामी दितिप्रवद्धागांवन्द्वचगोपेन्। नवसुवीरिपामानुवादइतिनिषत्तेनमहादित्याड्यायावबृहद्
दस्पावततो। प्रयेस्विष्टकृते। नुब्रू४हा। नु। के। ताविनत्रवसवस्त्रमहेवनेविकृतांतवः। प्रांविष्कं प्रांपुरु प्रियाय

दे॰ना॰
२०

हमायवोऌहवोरस्या । अग्निं स्विष्टकृतं यजेमेत्युक्ते । भूय एहे । अग्निं स्विष्टकृतमयाळग्निः पथ्यायाः स्वस्तेः ।। ३ प्रियाधामान्ययाडू
उद्वैः ।। अग्नेः ।। प्रियाधामान्ययाट् । सोमस्य । प्रियाधामान्ययाट् । सवितुः । प्रियाधामान्ययाट् । अदितेः ।। प्रियाधामान्यया
ड्देवानामाज्यपानां प्रियादिहविरिसंततं कृत्वा । पहा । हविष्टं तदन्यत्वेहह दर्वविभावसीम हविर्षीव तदपि स्वहाजाउ
दीरता ४ र्वौ ४ बद्द । ३ दकोपस्पर्शनं । अत्र संध्यस्तराणां तालुस्थाने आरकारीभवतइति कल्पवचनेनाद्दकारी
भावः ।। इसनाज्यभागपक्षे । आज्यभागपक्षेनुप्य॰ हे अग्निं स्विष्टकृतमयाळग्निरग्नेः प्रियाधामान्ययाडुसोमस्य प्रि
याधामान्ययाळ्यः पथ्यायाः स्वस्तेः । प्रियाधामान्ययाडित्यादि समाने । ततइलो यह्वाने उपहूतं इह हव्यदेवा देवयु
ने । उपहूतो यं यजमानो स्यपत्नस्यागुरउदवमशीयेति तत्स्मिनुपहूतः । मद्दृणाय नुया जातंत्र्यवेवनुस्तन्नवाचा
। इदं द्यावापृथिवी स्यादितयोरा विदीसंतमुक्त्वा पथ्यास्वस्ति ३ ॰ ह विं॰ कृतामग्निः उ॰ ह वि॰ कृताः सोमः ह॰ कृ
ताः सविता ह॰ कृता ।। अदितिः ह॰ कृता दिवा आज्यपादयादि । अग्निर्होत्रेणा॰ कृता । अस्यामद्यहोत्रायां देवंगमा
यामाशास्तेयं यजमानो स्यपत्नस्यागुरउदवमशीयेत्याशास्ते पदनेनहविषस्त्यादि पकृतिवत् ।। इसनाउ
भागपक्षे । आज्यभागपक्षेइ देधावा॰ दिग्नं स्विष्टं पृ॰ ततासोमोह विं॰ ततापथ्यास्वस्तिरित्यादि हर्वव ।। अ राम.
याविष्टीकतस्तउयोरितिपेत्न ।। उदं॰ एतदंत्यंतयमिष्टिः । ननु शंयंतात्रिकल्पे । वि॰ शंयोरणा॰ अंतं त्यथं प्र २०

यमशंयंतेयमिष्टिरिति । उच्यते । अस्यतंतः कर्म्मणांयंतिपत्नीसंयाजांतादीक्षणीयाशंयंताप्रायणीये । नांतातिथ्यादेव
नाशपससुप्रतिपत्तौ तिप्रज्ञातावुन्नरेन्नरकर्म्मराः एवंहवींयेत्रयास्यपदार्थतयुक्तं तत्र देवदत्ते यदि प्रथमशंय
ततानिपतोएवमातिथ्यायामपी लांतेतिवचनमविशिष्टमपिप्रथमेलांतंतांप्रतिपादयति । अत्रयाकृत्स्नति
वोधितउत्सर्गएवबाधटमानः स्यात् । तस्मात्पत्नीसंयाजांतोत्सर्गंबोधयंतीऽकृतिरेवप्रायणीयायांप्रथमशंयंततापां
प्रमाणीभवति । प्रतिपत्तिपक्षेवेदविमोकः ।। अयोक्त्रादीपक्षेयोक्त्रविमोकः । नवेदपत्नीवाचनंनापिवेदस्तरणंम
नापिवेदश्रेणाहवनीयपूर्णपात्रपरस्तात् ।। ।। इतिप्रायणीयेष्टिः ।। ।। अथराजक्रयः ।। तत्रसोमक्रयणीसंज्ञकांगां
शालापा । प्राग्द्वारादक्षिणातस्थितांप्रतिप्रस्थात्रादिनोदिशप्रतिनीयमानामध्वर्य्वादयोपक्रमानसहितात्रलु
मच्छंति । तत्रसोमक्रयण्याद्क्षिणपूर्वपादस्यसप्तमंपदेधर्युस्तुगृह्णातमासंजुह्गति । तत्रब्रह्मणोदक्षिणातस्सूत्री
मुपवेशने । पाज्ञमानमत्रपथाधेपूर्वदविहितंकार्य्यं । ततउपरवप्रदेशेप्रतिप्रस्थात्रासमानृतस्यसोमस्यक्रयणांकु
वंति ।। तत्रवद्धाप्रनृतिवर्त्मेत्रेणायचिशेत्तदक्षिणानः । ततागवादिनाराज्ञानंसोमंक्री । त्वाक्षमुणासमर्पितंसोमंप्रि
रंसियाणांमंतद्धोवोपरिसोमंह । त्वापतमानोदक्षिणातःस्थितंशकटंप्रतिगत्वाप्रकटस्थेकृष्माजिनेसोमंनिदधाति
। ततोक्षमुणासोमायपर्य्युह्यमाणायानुब्रूहीतिप्रात्वांतरात्सोमायपत्नीतापानुवषट्होतिवाप्रेषितेहोतावम्यसोम

वहनार्थं शकटस्य पश्चात् शकटं वक्रहयसंयर्पणसमुत्पादितावर्त्मप्रवाहिकाहयमध्ये पदुर्वंस्थलं तत्र निष्ठन् भद्रादभिप्रे
पद्यति कल्पसूत्रे त्रिरात्रं आश्वलायनेन एतस्याः पश्चात् त्रिपदमात्रे तु रेणावर्त्मनाति पादेति विशेषः। तथा च सूत्रं। तं प्रवसन्तु
पश्चादनसस्त्रिपदमात्रे तु रेणावर्त्मना अवस्थापयेति॥ नु भद्रादभिप्रेपः प्रेहिहृदस्य निःपुरएता तेऽअस्तु। अथ मवस
वरुआपथिमाआरेशत्रून् कृणुहि सर्ववीरो३ भद्रादभि श्रेय अस्तु। अथेमव वीरो३ भद्रादभि अस्तु। अस्मा
नायेव वचने ईर्द्वे विरमेत् यावदक्षयों न गच्छति। गच्छत्सु तेषु तिष्ठन्नेव शिष्टमर्द्धं कोचक्रवर्त्मनाऽऽत रेणानुगच्छे
युनुत्तराः पलवो नाह। अथेमवसवरुआ पथिमाआरेरा त्रून् कृणुहि सर्ववीरो३ इमां धियं शिक्षमाणस्य
देववक्रतुं दक्षं वरुणसंशिशाधि। ययाति विश्वादुरिताति रे मसुनर्माणमधिना वं रुहेमो३ वने पुर्षंतरिक्षं ततान
वाजमर्वत्सु पय उस्रियाहन्सुक्रतुं वरुणो अप्स्वग्निं दिवि सूर्यं मदधात्सोममद्रौ३ सोमया ते मयो भुवऊतयः सं
ति दाशुषे। ताभिर्नोविता भवो३ इमं यज्ञमिदं वचो जुजुषाण उपागहि। सोम त्वं नो वृधे भवो३ सोम गोभिष्टाव
ईयामोव चोविदः॥ सुमृलीको न आविशो३ गयस्फानो अमीवहा वसुवित् पुष्टिवर्द्धनः अत्राहुर्द्धं वस्तात्। ततः
पत्नीशाला या अग्रतः शकटमवस्थाप्य शालायां सोमं प्रवेशयं त्यध्वर्यवः॥ अत्राश्वलायनेविशेषः। शालायामग्रे
णादक्षुखे शकटे स्थापिते तस्य दक्षिणपार्श्वेन गत्वा अग्रतो राजानमभिमुखो होता वनिषत आप्यपादनात्। तथा च

सूत्रं॥ अवस्थिते तस्मिन् दक्षिणात्पश्चादभिक्रम्य राजानमभिमुखो वतिष्ठन् इति। ततः शालायां प्रपद्यमाने सोमे येन मार्गेण
धिष्ण्यादयो न तत्र आहवनीयं पूर्वमपरेणावाते तेनैव मार्गेणानुगच्छन् होतास्तु मित्रः सोमनो भवो३ याते धामानि हविषा यजंतिता
ते विश्वा परिभूरस्तु यज्ञं इत्यर्द्धर्चं आरमेत्॥ ततः आहवनीयात्पूर्वभागे दक्षिणाभिमुखस्तिष्ठन् पश्चान्नेत्यर्द्धर्चेनाग
देवत्पतिसंधाय त्रिः परिदध्यात्। यद्याहवनीयमपरेण गतो भवति तथापि समाहतत्रेणाहवनीयं परीत्याहवनीया
न्नः सविता सुप्रजामिषं। सनः क्षपा अभिरह भिर्जिन्वतु प्रजावंतरपि॥ मत्से सुभिचनो३ आगंदेव। मिषं। सनः क्षि
पत्नो३ आगंदेव। मिषं। सनः क्षपाभिर्वतो३ मूः। ततः प्राकृते नजलेनोपस्पृश्य स्थस्पृष्टे होतावाग्यमादेव नियमान्॥
॥ इति सोमक्रयः॥ ॥ इत ऊर्ध्वमुपसज्जोनीर क्षियग्रतिमदं ती अस्यान्तिथ्या यमाध्वर्यवोक्तोपदंतीसंज्ञायां आप
ना भिरुदक प्रयोक्त नंकत्वं गतपाविहितमुपसर्जनादिकुर्याद्ग्रीषोमप्रणयनात्॥ इतः तु नरं यतिं चिदुदककार्ये
र्वत्र तर्पयणीतात्प्रणयनाङ्गोऽपरणीदकोपस्पर्शनाचयनादिकं पुरुषार्थं वनेमित्रिकं स्नानशौचावमनपानादिकं
न सर्वमदं सुदकेनैव कार्यमिति देवयाज्ञिकाऽऽह॥ ॥ अथातिथ्येष्टिः॥ ॥ अग्न्याधानव्रतह्वरणव्रतग्रहण
व्रतविसर्गाणामभावः। तथा च कात्यायनसूत्रं॥ अग्न्याधानव्रतोपायनारण्यभोजनदानव्रतह्वरणानि दीक्षणी

दे॰भा॰
२२

यावप्रभृति प्रागुदवसानीयायाः सोमेष्टकृतत्वादिति। तत्रादावासन्नेह विष्णग्निमंथनं। आसन्नेह विष्णातिप्ये ग्निमंथं त्रातिसूत्रेतः॥
आवमती श्रीनप्रविष्टप्य प्रश्नाहेदे श्रवृस्थापायप्रेमथ्यमानायेति संप्रेषे तोहो तान्निमंथनीया अन्वाह अभि त्वा मीम
हो ३ त्रिः॥ महीयो ॰ म सो ३ त्वा ममे॰ पत्तो ३ तमु त्वा दध्य॰ दरो ३ त मु त्वा पा॰ त्र मे। अत्रावृस्पतत्॥ जातायानुब्रू ४ हो। सुत्ते ध न
जयं रणे रणो ३ उत्त्वक्वं तु त्र नि। हस्तिनक्षाग्नमाणं हस्ता। धनंजयं रणे रणो ३ आपंह दिश्न्ति। प्रहियमाणायानुब्रू ४ हो
सुत्ते। विप्राम ग्निं स्वध्वरो ३ ३ प्रदेवं देववी॰ आऽयातु तौ हूयमानायानुब्रू। स यो नो॰ दतो ३ आ जातं॰ पतो ३ अग्नि नाग्नि॰
हास्पो ३ तं स्प्लेत्र॰ असो ३ तं मन्त्रे पंत॰ जिनो ३ मू। इ तिय रिक्षानीया॥ ॥यज्ञेन यज्ञमिति न भवति। पश्चाद्गत्वा भा
वात्॥ पुनरपवश्यकं प्रयया दिप्रहृतिव त्वर्ष्या त्वा समदश्च सामिधेन्य॥ सप्तदश सामिधेनीरन्वाहेति सूत्रेतः॥
अग्निमग्न आ ४ वह। सोमम आ ४ वह। इमा ऊ॰ भा गो। ततः प्रधान मु पांशु हविः॥ विष्णुं उपांशु। आ ४ वहेपुरोः। दे
वानित्यादिप्रमानं। तत्र मेप्रयाजे भू ये॰ हे स्वाहा। अग्निं स्वाहा सो मं स्वाहा। विष्णुं उपांशु स्वाहा देवाइमा दिपवृत्तिं॥ वा
र्त्रघावाजयभागावन्निरिं ना गो तं सो मा सा ति। अत्रा म्ब ल पत्नानां समिद्धाग्नि दुव स्य तात्प्रायस्व समेतु तइ स त्तिथि
मत्त्रावाइप भागौ भवतः। अस्माकं तु अतिथिमंतो हेके कुर्वंति ह्या र्त्रघ्नो त्वे वृक्षिते नाविति सूत्रेते वार्त्रघ्न एवेवभवतः॥ त राम
तः प्रधानं विष्णवे। अनु ब्रू ४ हि सुत्ते। विष्णो र्नुकं वीर्याणि प्रवो चं यः पार्थिवानि विममे रजांसि। यो अस्कभायदुत्तरं स २२

वस्थं वि चक्रमाणस्त्रेधोरुगायः॥ नुं वि स्नुं॥ पत्रा॰ भू॰ ये ४ हो॰ वौ॰ प्रतद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः। प
स्यो रु पु त्रिषु विक्रमणेष्वधि क्षियंति भुवनानि विश्वा। उपांशु वौ ४ षट्। इमु बे॥ नुं जः॰ अत्र प्रधानावदानकाले प्रश्ने
तापस्थं वर तिन्त्व मो श्रान स सामगायेत्॥ तत्र त्वा नोहा इ इति म चि धर्तते तन सह वषट् कुर्यात्॥ पशु वो प य ज्ञा महो व ष
ह्कारः संप्रेषा ष्टो बृरु पां शु ह विः पुइ ति कस्य वचना दु पांशु ह विं शुस वेत्र प्रणा वादी ना मु द्रे ह्लं प रि सं ख्या ना दुन्नद् उपांशु।
ततो ग्ने स्विष्टकृतः। तुब्रू ४ हो सुत्ते। होतारं चित्ररथमध्वरस्य यज्ञस्य यज्ञस्य केतुं रुशंतं। प्रत्य र्धिं देवस्य देवस्य म
ह्ना श्रिया त्वग्निमतिथिं जनानां ३ म्। अग्निं स्विष्टकृतं यजेमु त्ते भू॰ ये ४ हो। अग्निं स्विष्टकृत मयाल ग्निरग्नेः प्रिया धामा न
याट् सोमस्य प्रिया धामान्यया इ॥ विष्णो॥ उपांशु। प्रिया धामान्ययाइ देवाना मित्यादि तु पवनां ह विषस्वास्वस्थाः सु हि रा प
अयइ ड प या तिव मु म ता र थे न। तस्मात्ता भव सि त स्य स स्वायस्तु अ। ति श्यमानु षस्तु जोषा ४ हौ ४ षट्। तु जः॥ ३ द को॥
देवतानाम श्ये यं श्रोपांशु त्रि गम स्थाने श्रि नि कस्य वचनाद्वा ह ना दि नि गमे षु देवतापदमुपांशु पांश्व्येसर्वत्रोपांशु हविः
षु। तत इडोपह्वानं। इ प हू तं ह ह त। दैवा दैवा पुत्रे अनुपहूतो यं यजमानो स्यप इ हा गुरु र ह व म श श्री पतित स्मि न्नु प हू तः॥ मद
॥ मार्जनं। वेद विमोकः॥ अपोत्र हृदी त्वा प स्त्रो वो॰ ३ विमोकः॥ प्रथमे ज्ञा तावे य मिष्टि। इ ः लो ता तिष्ठ्येति सूत्रे तः॥ ॥ इमा
ति ष्याष्टेः समाप्ता॥ ॥ ततः पवित्र प्रति प ते पजमानस्य व्रत पात्रं वेदो निधाय तस्मिन्न ब्रह्मा दिक्क मे रा स वे नं विज

आपतयेत्वेत्यादिनाध्वर्युर्वेदोन्नेनमंत्रेणसकृत्प्रीवमाऽस्यंस्वलंस्वलंगृहीत्वास्फ्याःसकाशात्तृणहिंहिंसकृन्मीत्स्वेवेण
गृह्णंति।सदस्ययजमानावप्येवमेवगृह्णीतः॥नुंआपतयेत्वापरिपतयेगृह्णामितनूनप्त्रेशाक्वरायशक्वनओजिष्ठा
याइतिमंत्रेणाऽसंगृहीत्वातृणीवहिंहिंगृहीत्वासदस्यसप्तदशानृत्विजःसयजमानकाम्रुमसाध्वर्युवर्जिताःसद
तोरुपस्पृश्यचरणाक्रमेणकोस्यपात्रीस्फ्यौवंश्रुवासंर्वधिहिरण्यसहितमसंपृक्तंवांतर्वेदिबर्हिषिस्थापितंतानू
नप्त्रसंज्ञमाज्यमवमृशंति॥नुंअनाधृष्टमस्यनाधृष्यंदेवानामोजोनभिशस्त्यभिशस्तिपाःअनभिशस्तेन्यम्
जसासत्यमुपगेषंस्वितेमाधाइतिमंत्रेणसमवमर्श्यपुनर्न्मदंतोरुपस्पृश्यपूर्वेणाहवनीयंपरीत्यदक्षिणा
भागेणासंयामास्क्रिन्नंसोमंदक्षिणेनपरीत्यप्राङ्मुखास्तिष्ठंतःअंशूनुपस्पृशंतस्त्रिपर्वसोमांशूनांस्पर्शनु
वंतःसोममाप्याययंतेविसंस्याल्लमंतइत्यर्थः॥नुंअंशुरंशुष्टेदेवसोमाप्यायतामिंद्रायैकधनविदे॥आनु
भ्यमिंद्रःप्यायतामात्वमिंद्रायप्यायस्वाप्याययास्मान्सखीन्सन्यामेधयास्वस्तितेदेवसोमसुत्यामुदृचमशीयेति
।अध्वर्युर्वेचरणासंदीमंत्रेणैवमार्गः।तथाचबौधायनः।माराजानंयाहवनीयंवांतरेणाक्रमनसंचारादिति।
।ततःस्वंस्वंहृदयमभिमृशंति।एषमादित्याअंशुमाप्याययंतियमक्षितिमक्षितयःपिबंतितेननोराजावरुणोबृ राम
हस्पतिराप्याययंतुभुवनस्यगोपाःइति।ततःपुनरुपस्पृश्यराजानंदक्षिणेनपरीत्याहवनीयंपूर्वेणागत्यवेद्यामासंद्यां २३

काश्मपेप्रस्तरेवामहस्तंस्रुवंकृत्वादक्षिणांचोत्तानंकृत्वास्मादयोनिहुवतेखलुयजमानोवदक्षिणातःस्थितावेवन
सोमाप्यायननिह्नवौकुरुतः॥किंतुयथास्वंसंचरमागत्याहवनीयंपूर्वेणापरीत्यसोमाप्यायनंकृत्वातथैवप्रत्यागत्यप्र
स्तरेनिह्नवंकृत्वाततोयथागतंगत्वासदस्थानेउपविशतः॥ॐएष्टारायःप्रेषेभगायऋतमृतवादिभ्योनमोद्यावा
पृथिवीभ्यामिति।एवमापराह्णिकेप्रचारेसव्यानुत्तानाभ्यांदक्षिणान्नीचैःकृत्वानिह्नुवीरन्।निह्नवनंनामद्यावापृ
थिव्योर्नमस्कारः।तथाचब्राह्मणंप्रस्तरेनिह्नुवंतेद्यावापृथिवीभ्यामेवतन्नमस्कुर्वंतीति।आप्यायनमुरोभि
मर्शनंप्रस्तरेनिह्नवनमित्यादिपदार्थजातंपूर्वेद्युरहस्समारण्यत्तद्वराण्यामुपसद्युपसदिसमासायांकर्तव्यंत
च्चपौर्वाह्णिकामुपसदिदक्षिणोत्तानंधर्मः॥आपराह्णिकामुपसदिसव्योत्तानंधर्म्मः॥अत्राप्यायनेयजमा
नपक्षःसोममाप्याययंतीतिशातपथश्रुतेर्वेद्योहोतृहोत्वक्षे+द्योग्नाश्रयजमानानांबस्समेवाधिकारः।तदंगत्वा
न्निह्नवेपिकस्यमांप्यौ।पमेवपक्षोभिहितः॥तेत्रिरेषांसर्वेषामाप्यायनेनथैवास्माकमपीतिसर्वेषामाप्या
यनंयदनावभिहितं।अतस्तद्रूपानुष्ठानंविधेयं।अथप्रवर्ग्यःर्ग्यः।तत्रप्रथम[illegible]मपञ्जीप्रिस्तेमस्तेइक्षितोभ
वति।तत्रप्रथमपदंतेपृष्ठंइत्यादिनिश्रुतेः॥श्रौत्रियस्याधिगतसकलवेदार्थस्याधिकारः।कामंतुयोनवानःश्रौत्रि
यस्यात्रस्यपदंस्यादितिश्रुतेः॥योवचानोधर्म्मोपदेशःयोत्रिपीध्ययनपूर्वंतदर्थानुष्ठानात्तस्यकाममिच्छयाविक

दे॰ भा॰ २४ ऽत्येन पञ्चहस्तादित्यर्थः॥ तेन सोत्तरप्रदर्शितो। तत्र पूर्ववत् पाणौ शालाद्वारे गाम पिधानं। पत्नी प्रवर्ग्यदर्शनेन कार्यमेवेदिके
भू...दि मिश्रः। ततो यजमानहोत्रध्वर्युप्रतिप्रस्थातृप्रस्तोतारो ... ऋग्वेदोक्तं ऋचं वाचमित्यध्यायं शान्त्यर्थं प
ठंति। सोऽञ्जलि ...॥ ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये। वागोजः सहौजो म
यि प्राणापानौ॥ १॥ यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु। शन्नो भवतु भुवनस्य य
स्पतिः॥ २॥ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ ३॥ कया नश्चित्र आ भु
वदूती सदावृधः सखा। कया शचिष्ठया वृता॥ ४॥ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः। दृढा चिदारुजे वसु॥ ५॥
अभी षु णः सखीनामविता जरितॄणां। शतं भवास्यूतिभिः॥ ६॥ कया त्वं न ऊत्याभि प्र मन्दसे वृषन्। कया स्तोतृभ्य
आ भर॥ ७॥ इन्द्रो विश्वस्य राजति। शन्नो अस्तु द्विपदे शं चतुष्पदे॥ ८॥ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा। शन्न इन्द्रो
बृहस्पतिः शन्नो विष्णुरुरुक्रमः॥ ९॥ शन्नो वातः पवतां शन्नस्तपतु सूर्यः। शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु॥ १०॥
अहानि शं भवन्तु नः शं रात्रीः प्रतिधीयतां। शन्न इन्द्राग्नी भवतामवोभिः ...आपो भवंतु पीतये। शं योरभिस्रवंतु नः॥ ११॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी। यच्छा नः शर्म सप्रथाः॥ १२॥ ...भिः शन्न इन्द्रावरुणा रातहव्या। शन्न इन्द्रापूषणा वाजसा राम
तौ शमिन्द्रासोमा सुविताय शंयोः॥ १३॥ शन्नो देवीर...॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ १४॥ यो २४

वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ १५॥ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ १६॥ द्यौः न१
शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः
सा मा शान्तिरेधि॥ १७॥ दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्तां। मित्रस्याहं चक्षुषा सर्वाणि भूतानि स
मीक्षे। मित्रस्य चक्षुषा समीक्षामहे॥ १८॥ दृते दृंह मा। ज्योक्ते संदृशि जीव्यासं ज्योक्ते संदृशि जीव्यासं॥ १९॥ नमस्ते हरसे शोचि
षे नमस्ते अस्त्वर्चिषे। अन्याँस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव॥ २०॥ नमस्ते अस्तु विद्युते नमस्ते स्तनयि
त्नवे। नमस्ते भगवन्नस्तु यतः स्वः समीहसे॥ २१॥ यतो यतः समीहसे ततो नो अभयं कुरु। शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः
॥ २२॥ सुमित्रिया न आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥ २३॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमु
च्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च
शरदः शतात्॥ २४॥ इति शान्त्यध्यायः॥ ॥ ततस्ते रता गार्हपत्यं प्रदक्षिणं प्रचारो भवति। तत्र ब्रह्मा ... तत्रैव प्रविशेत्॥
दक्षिणतः यजमानश्च। ततोऽध्वर्युराग्नीध्रीयं ... पुंसः ... मानेषु होता ... पूर्वद्वारा शालां प्रविश्य
हवनीय ... स्वं स्वं ... ततो विशेषो ... अग्नीषोमीयो ... प्रवर्ग्यप्रचारप्र
देशस्य गार्हपत्यस्य ... पश्चादुपविशेत्॥ ब्रह्मा च दक्षिणाग्रेः पश्चादुपविशेत्। ततोऽध्वर्युः ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामः
होतरभिष्टुहि ... ब्रह्मानुज्ञातो ... एवं ...
घ॰ घा॰

दे० भा०
२५

रशातसंख्याकाऊचञ्चाभिधीयतिमध्यमस्वरेणोक्तस्यैवेरा।तास्वैरुर्वी हैचं स्यातिमात्तरेणास्महोत्रराहैर्हं स्यादिमवर्स्मस्येयथामा
यसंवर्धक्तत्वावसानेषिनैकैकामस्वंपदेन॥ऋगंतेऋगंतेमकारांतप्रणवंकृत्वावसानंतु यीत॥त्रिःप्रथमांत्रिरुत्तमां॥ ॥नुंब्रह्मजज्ञा
नंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवःसबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः॥ब्रह्मजज्ञानंप्रथमंपुरस्ताद्वि
सीमतःसुरुचोवेनआवःसबुध्न्या॰ विवोऽस्य ब्रह्म॰ आवःसबुध्न्या॰ विवोऽस्य।इयंपित्रेराष्ट्र्येत्यग्रेप्रथमायजनुषेभुमनेष्ठाःतस्मा
एतंसुरुचंह्वारमह्यंघर्मंश्रीणंतिप्रथमस्यधासोऽस्य महांआभिसंदेवंसविता रेमेणपाः कविक्रतुमर्चामिसत्यसवंरत्नधाम
भिप्रियंमतिंकविमूर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपा स्वोऽस्य।सुक्रतुःस्वपास्व
अस्यरतिवा॥अर्जंतिपंप्रथयंतोनविप्राववपावंतंम्नाभिनातपंतः॥इपितुर्नपुत्रउपसिप्रेष्ठआघर्मोअग्निमृतयन्नसादीः
अस्यएतामेवंमहावीरयात्रमुखांजना नूनंवमारभ्यमहावीरयात्रमुखेषु तेनाप्समानेपदेन॥यौष्पि कल्पसूत्रेअर्जंतिपभिति घ
विलेऽप्समानइतिविलेऽप्समानेऽप्सामेविहितस्तथायोपमृगामंजनास्सर्वमेवास्वयाअध्वर्युवशातः॥तथावशांतपथीअनिः॥
सपत्नेतांहोतान्वाहांतंतिपंप्रथपर्तनविप्राइतितदेतंपूर्वरराणिपंमहावीरसाजेनसमनक्तीति।एवंसंसीदस्वेतिसाधुमानइसन्नाभि घ४
कृस्वेगाहंपसाकृत्तरंतोहोतुःपुरस्तात्खरेरेसिकत्तोपकीर्से प्रह्लात्यस्थापितेशुमुंजपलवेष्वाऽपसृणोमहावीरमांडुसोमानेक्रमारेः घ२
विहितस्तथापिसादनासर्वमेवारस्वयासंसीदस्वेतिआध्वर्युवशातः॥तथावशांतपथोअनिः॥सपूर्नेतांहोतान्वाहसंसीदस्वमहां राम
असीतितदुभयतआदीःमोंजाःवसवाभवंतितेषुप्रहराणीति।संसीदस्वमहांअसिशोचस्वदेववीतमोविधूममग्नेअरुषंमि २५
शा१

येध्यसृजप्रशस्तदर्शतोऽस्य।ततोध्वर्युराहहविर्ध्यांगार्हपत्यांगारेषुमहावीरंपरिकीर्यमाणेषुभवानइत्याघ्रास्विस्वःपरेत
भवानोअग्नेसुमनाउपेतौसखेवसख्येपितरेवसाधुःपुरुद्रुहोहिक्षितयोजनानांप्रतिप्रतीचीर्दहतादरातीरस्य।तपोष्वग्ने
अंतरांअमित्रांतपाशंसमररुषःपरस्य।तपोवसोचिकितानोअचित्तान्वितेतिष्ठंतामजराअयासोऽस्य।पाहिनःसनुमोअभि
दासंदभ्रेयोअंतरोमित्रमहोवनुष्यान्मजरेभिर्देषाभिःस्तवृद्धविद्रुपाततपिष्ठतपसातपस्वोऽस्य।हरागुष्याजःप्रासितिन्नर
श्रीयाहिराज्ञेवामवाइभेनतृन्नामनुप्रासितिद्रुणानोऽस्ताऽसिविध्यरक्षसस्तपिष्ठोऽस्य।तववभ्रमासआगुयापतंत्यनुस्पृ
शधृष्णताशोशुचानस्तनृत्वम्येजुह्वायतंगातसंदिनोविसृजविष्वगुल्काऽस्य।प्रतिस्पशोविसृजतूर्णितमोभवापायु
र्विशोअस्याअदब्धोयोनोदूरेअघशंसोयोअंत्यग्नेमाकिष्टेव्यथिरादधर्षीऽस्य।उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँओषतात्ति
ग्महेनेयोनोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसंनशुष्कंऽस्य।ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्य
ग्ने।अवस्थिरातनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून्ऽस्य।परित्वागिर्वणोगिरइमाभवंतुविश्वतोवृद्धायुम
नुवृद्धयोजुष्टाभवंतुजुष्टयोऽस्य।अधिद्वयोरदधानुक्थ्यंवचोयतस्रुचामिथुनायासपर्यतो।असंयत्तोव्रतेतेक्षेतिपुष्य
तिभद्राशक्तिर्यजमानायसुन्वतोऽस्य।अनुवंजेअन्नमघजातंतेअग्ने।हव्यहिपुरुहूपेअहनीद्यौरिवासिविश्वाहिमायाअवसि
स्वधावोभद्रातेपूषन्निहरातिरस्त्वोऽस्य।अहींचमर्घसायकानिष्कंचाहन्निष्कंयजतंविश्वरूपमर्हन्निदंदयसेविश्वम

दे॰ भा॰ २६

ध्वंनवानुज्ञायोरुड्डत्वदन्तो ॥३म्॥ पतंगमक्तमसुरस्य मायया हृदा पश्यंति मनसा विपश्चितः समुद्रे अंतः कवयो वि चक्षते मरीचीनां प
दमिच्छंति वेधसो ॥३म्॥ पतंगो वाचं मनसा बिभर्ति तां गंधर्वोवदद्गर्भे अंतः तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पांति ॥३म्॥
अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वंतो ॥३म्॥ स्रक्वे द्रप्सस्य
धमतः समस्वरन्नृतस्य योना समरंत नाभयः त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरो ॥३म्॥ सम्यक्सम्यंचो म
हिषा अहेषत सिंधोरूर्मावधि वेना अवीविपन् मधोर्धाराभिर्जनयंतो अर्कमित्प्रियामिंद्रस्य तन्वमवीवृधो ॥३म्॥ पवित्र
वंतः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतं महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभो ॥३म्॥ सह
स्रधारेव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतो अस्य स्पशो न नि मिषंति भूर्णयः पदेपदे पाशिनः संति सेतवो ॥३
म्॥ पितुर्मातुरध्या ये समस्वरन्नृचा शोचंतः संदहंतो अव्रतानिंद्रद्विष्टामप धमंति मायया त्वचमसिक्नीं भूमनो दिवस्प
रो ॥३म्॥ प्रत्नान्मानादध्या ये समस्वरं श्लोकयंत्रासो रभसस्य मंतवः अपानक्षासो बधिरा अहासत ऋतस्य पंथां न तरंति दु
ष्कृतो ॥३म्॥ सहस्रधारे वितते पवित्र आ वाचं पुनंति कवयो मनीषिणः रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वंचः
सुदृशो नृचक्षसो ॥३म्॥ ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यंतरा दधे विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजु
ष्टान्विध्यति कर्ते अव्रतो ॥३म्॥ ऋतस्य तंतुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया धीराश्चित्तत्समिनक्षंत आशता राम
त्रा कर्तमव पदात्यप्रभो ॥३म्॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतो अतप्ततनूर्न तदामो अश्नुते शृतास २६

इद्वहंतस्तत्समाशतो ॥३म्॥ तपोष्पवित्रं विततं दिवस्पदे शोचंतो अस्य तंतवो व्यस्थिरन् अवंत्यस्य पवीतारमाशवो दिवस्पृष्ठमधि
तिष्ठंति चेतसो ॥३प॥ वि नेषि पराण्यन्तत्तुहम्मशोचंत प्रणावे पुरिक्षतः समुद्रे अंतरायवो विचक्षणं त्रिरह्नो नाम सूर्यस्य
मचतो ॥३म्॥ अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने इममपां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहं
ति ॥३म्॥ समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि ऋतस्य सानावधि विष्टपि भ्राट्समानं योनिमभ्यनूषत
व्राः ॥३म्॥ समानं पूर्वीरभि वावशानास्तिष्ठन्वत्सस्य मातरः सनीडाः ऋतस्य सानावधि चक्रमाणा रिहंति मध्वो अमृतस्य वा
णीः ॥३म्॥ जानंतो रूपमकृपंत विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ऋतेन यंतो अधि सिंधुमस्थुर्विदद्गंधर्वो अमृतानि नामो
॥३म्॥ अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् चरत्प्रियस्य योनिषु प्रियः सन्सीदत्पक्षे हिरण्यये स वेनो ॥३म्॥
ऊर्ध्वो गंधर्वो अधि नाके अस्थात्प्रत्यङ्चित्रा बिभ्रदस्यायुधानि वसानो अत्कं सुरभिं दृशे कं स्वर्ण नाम जनत प्रियाणि ॥३म्॥ द्र
प्सः समुद्रमभि यज्जिगाति पश्यन्गृध्रस्य चक्षसा विधर्मन् भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि
॥३प॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूति
भिः सीद सादनं ॥३म्॥ देवाश्चित्ते असुर्य प्रचेतसो बृहस्पते यज्ञियं भागमानशुः उस्रा इव सूर्यो ज्योतिषा महो विश्वेषामि
ज्जनिता ब्रह्मणामसि ॥३म्॥ आ विबाध्या परिरापस्तमांसि च ज्योतिष्मंतं रथमृतस्य तिष्ठसि बृहस्पते भीममभित्रदंभ

देंभा०
२७

नरक्षोहणंगोत्रभिदंस्वर्विदं ३ न्म।सुनीतिभिर्नयसित्रायसेजनंयस्तुभ्यंदाशान्नतमंहोअश्नवद्ब्रह्मद्विषस्तपनोमन्युमी
रसिबृहस्पतेमहितत्तेमहित्वनं ३ न्म।नतमंहोनदुरितंकुतश्चननारातयस्तितिरुर्नद्वयाविनः।विश्वाइदस्माद्ध्वरसो
विबाधसेयंसुगोपारक्षसिब्रह्मणस्पते ३ न्म।त्वंनोगोपाःपथिकृद्विचक्षणस्तवव्रतायमतिभिर्जरामहेबृहस्पतेयोनोअभि
ह्वरोदधेस्वातंमर्मर्तुदुच्छुनाहरस्वती ३ न्म।उतवायोनोमर्चयादनागसोऽरातीवामर्त्तःसानुकोवृकः।बृहस्पतेअपतंवर्त्त
यापथःसुगंनोअस्यैदेववीतयेकृधि ३ न्म।त्रातारंत्वातनूनांहवामहेऽवस्पर्त्तरधिवक्तारमस्मयुं।बृहस्पतेदेवनिदोनिबर्ह
यमादुरेवाउत्तरंसुम्नमुन्नशन् ३ न्म।त्वयावयंसुवृधाब्रह्मणस्पतेस्पार्हावसुमनुष्यादंदीमहि।यानोदूरेतळितोयाअराता
योभिसंतिजंभयातांअनप्नसो ३ न्म।त्वयावयमुत्तमंधीमहेवयोबृहस्पतेपप्रिणासस्निनायुजा।मानोदुःशंसोअभि
दिप्सुरीशतप्रसुशंसामतिभिस्तारिषीमहि ३ न्म।अनानुदोवृषभोजग्मिराहवंनिष्टप्ताशत्रुंपृतनासुसासहिः।असिसत्य
ऋणयाब्रह्मणस्पतउग्रस्यचिद्दमितावीळुहर्षिणः ३ न्म।अदेवेनमनसायोरिषण्यतिशासामुग्रोमन्यमानोजिघांस
तिबृहस्पतेमाप्रणक्तस्यनोवधोनिकर्ममन्युंदुरेवस्यशर्द्धतः ३ न्म।भरेषुहव्योनमसोपसद्योगंतावाजेषुसनिताध
नंधनंविश्वाइदर्योअभिदिप्स्वोमृधोबृहस्पतिर्विववर्हारथांइव ३ न्म।तेजिष्ठयातपनीरक्षसस्तपयेत्वानिदेदधिरेदृष्टवीर्यं राम
आविस्तत्कृष्वयदसत्तउक्थ्यंबृहस्पतेविपरिरापोअर्दय ३ न्म।बृहस्पतेअतियदर्योअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु २७

यद्दीदयच्छवसऋतप्रजाततदस्मासुद्रविणंधेहिचित्रं ३ न्म।मानःस्तेनेभ्योयेअभिद्रुहस्पदेनिरामिणोरिपवोन्नेषुजागृ
धुः।आदेवानामोहतेविव्रयोहृदिबृहस्पतेनपरःसाम्नोविदुः ३ न्म॥विश्वेभ्योहित्वाभुवनेभ्यस्परित्वष्टाजनत्साम्नःसाम्नःक
विः।सऋणचिदृणयाब्रह्मणस्पतिर्द्रुहोहंतामहऋतस्यधर्त्तरि ३ न्म।तवश्रियेव्यजिहीतपर्वतोगवांगोत्रमुदसृजोयदंगि
रः।इंद्रेणयुजातमसापरीवृतंबृहस्पतेनिरपामौब्जोअर्णवं ३ न्म।ब्रह्मणस्पतेत्वमस्ययंतासूक्तस्यबोधितनयंचजिन्वविश्वं
तद्भद्रंयदवंतिदेवाबृहद्वदेमविदथेसुवीराः ३ न्म।बृहद्वदेमविदथेसुवीराइतिपादेवारकामायेपत्नीपथाभिलषितंवीरंध्याया
त।काराधद्धोत्राश्विनावांकोवांजोषउभयोः।कथाविधात्यप्रचेताः ३ न्म॥विद्वांसाविद्दुरःपृच्छेदविद्वानित्थापरोअचेतानूचिन्नु
मर्त्तेअक्रौ ३ न्म॥ताविद्वांसाहवामहेवांतानोविद्वांसामन्मवोचेतमद्य।प्रार्चद्दयमानोयुवाकुः ३ न्म।विपृच्छामिपाक्यानदेवा
न्वषट्कृतस्याद्भुतस्यदस्रा।पातंचसह्यसोयुवंचरभ्यसोनः ३ न्म।प्रयाघोषेभृगवाणेनशोभेययावाचायजतिपज्रियोवां
प्रैषयुर्नविद्वान् ३ न्म।श्रुतंगायत्रंतकवानस्याहंचिद्धिरिरेभाश्विनावाम्।आक्षीशुभस्पतीदन् ३ न्म।युवंह्यास्तंमहोरन्युवंवाय
न्निरततंसतं।तानोवसूसुगोपास्यातंपातंनोवृकादघायोः ३ न्म।माकस्मैधातमभ्यमित्रिणेनोमाकुत्रानोगृहेभ्योधेनवो
गुःस्तनाभुजोअशिश्वीः ३ न्म।दुहीयन्मित्रधितयेयुवाकुरायेचनोमिमीतंवाजवत्यैइषेचनोमिमीतंधेनुमत्यै ३ न्म।आनो
विश्वाभिरूतिभिरश्विनागच्छतंयुवंदस्राहिरण्यवर्त्तनी।पिबतंसोम्यंमधु ३ न्म।आनूनंयातमश्विनारथेनसूर्यत्वचा

दे॰भा॰ २८ भुजीहिरण्यपेशसाकवीगंभीरचेतसा ३म्। आयातंनहुषस्पर्यांतरिक्षात्सुवृक्तिभिः पिबाथोअश्विनामधुकण्वानांसवनेसुतं
३म्। आतर्यावाराणाद्वथ्यमायज्ञक्षमितिपंचवर्षस्रन्नयोवांक्षिकेप्रवपित्रवारेभिरुयातं। आतर्यावाराणाद्वथ्यमायज्ञक्षंपुराग
धाहररुषःपिबातःआतर्हिंयज्ञमश्विनादधातेप्रशंसंतिकवयःशर्दमाजौ ३म्। प्रातर्यज्ञधमश्विनाहिनोतनसायमस्तिदेव
अजुष्टमतान्योअस्मयजतेविचावःपूर्वःपूर्वोयजमानोवनीयो ३पू। हिरण्यत्वमधुवर्णोघृतस्नुःपृक्षोवहन्नारथो
वर्त्ततेवांमनोजवाअश्विनावातरंहायेनतियाथोदुरितानिविश्वा ३म्॥ योभूयिष्ठंनासत्याभ्यांविवेषचनिष्ठंपित्वोररतेवि
भागेसतोकमस्मपीयरक्षमीभिरन्तईमासःसदमिन्नुतुर्यो ३म्। समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेमा
नोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानो ३म्। तनईलेद्यावापृथिवीपूर्वचित्तयेग्निंघर्मंसुरुचंयामन्निष्टयेया
भिर्भरेकारमंशायजिन्वथस्ताभिरूषुऊतिभिरश्विनागतं ३म्॥ युवोर्दानायसुभराअसश्चतोरथमातस्थुर्वचसंनमं
तवेयाभिर्धियोवथःकर्मन्निष्टयेताभि॰गतं ३म्। युवंतासांदिव्यस्यप्रशासनेविशांक्षयथोअमृतस्यमज्मना
याभिर्धेनुमस्वंपिन्वथोनरात्ताभि॰गतं ३म्। याभिःपरिज्माननयस्यमज्मनाद्विमातातूर्षुतरणिर्विभूषतियाभिस्त्रि
मंतुरभवद्विचक्षणास्ताभि॰गतं ३म्। याभीरेभंनिवृतंसितमद्भ्यउदंदनमैरयतंस्वर्दृशेयाभिःकण्वंप्रसिषासंतमावतंता राम
भि॰गतं ३म्। याभिरंतकंजसमानमारणेभुज्युंयाभिरव्यथिभिर्जिजिन्वथुर्याभिःकर्कंधुंवय्यंचजिन्वथस्ताभि॰गतं ३ २८

याभिःशुचंतिंधनसांसुषंसदंतप्तंघर्ममोम्यावंतमत्रयेयाभिःपृश्निगुंपुरुकुत्समावतंताभि॰गतं ३म्। याभिःशची
भिर्वृषणापराव्रजंप्रांधंश्रोणंचक्षसएतवेकृथःयाभिर्वर्तिकांग्रसिताममुंचतंताभि॰गतं ३म्। याभिःसिंधुंमधु
मंतमसश्चतंवसिष्ठंयाभिरजरावजिन्वतंयाभिःकुत्संश्रुतर्यंनर्यमावतंताभि॰गतं ३म्। याभिर्विश्पलांधनसामथ
र्व्यंसहस्रमील्हआजावजिन्वतंयाभिर्वशमश्व्यंप्रेणिमावतंताभि॰गतं ३म्। याभिःसुदानूऔशिजायवणिजे
दीर्घश्रवसेमधुकोशोअक्षरत्कक्षीवंतंस्तोतारंयाभिरावतंताभि॰गतं ३म्॥ याभीरसांक्षोदसोद्नःपिपिन्वथुरन
श्वंयाभीरथमावतंजिषेयाभिस्त्रिशोकउस्रियाउदाजतताभि॰गतं ३म्। याभिःसूर्यंपरियाथःपरावतिमंधा
तारंक्षैत्रपत्येष्वावतंयाभिर्विप्रंप्रभरद्वाजमावतंताभि॰गतं ३म्। याभिर्महामतिथिग्वंकशोजुवंदिवोदासंशंबर
हत्यआवतंयाभिःपूर्भिद्येत्रसदस्युमावतंताभि॰गतं ३म्। याभिर्वम्रंविपिपानमुपस्तुतंकलिंयाभिर्वित्तजानिंदु
वस्यथोयाभिर्व्यश्वमुतपृथिमावतंताभि॰गतं ३म्। याभिर्नराशयवेयाभिरत्रयेयाभिःपुरामनवेगातुमीषथुर्याभिः
शारीराजतंस्यूमरश्मयेताभि॰गतं ३म्। याभिःपठर्वाजठरस्यमज्मनाग्निर्नादीदेच्चितइद्धोअज्मन्नायाभिःशर्या
तमवथोमहाधनेताभि॰गतं ३म्। याभिरंगिरोमनसानिरण्यथोग्रंगच्छथोविवरेगोअर्णसःयाभिर्मनुंशूरमिषा
समावतंताभि॰गतं ३म्। याभिःपत्नीर्विमदायन्यूहथुराघवायाभिररुणीरशिक्षतंयाभिःसुदासऊहथुःसुदेव्यंताभि

दे॰भा॰ ॰गतो ३ मृ॰ याभिः शंताती भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुं ओम्यावतीं सुभरामृतस्तुभं ताभि॰गतो ३ मृ॰ याभिः कृ
२९ शानुमसने दुवस्यथो जवे याभिर्यूनो अर्वंतमावतं मधु प्रियं भरथो यत्सरड्भ्यस्ताभि॰गतो ३ मृ॰ याभिर्नरं गोषुयुधं नृषाह्ये
क्षेत्रस्य साता तनयस्य जिन्वथो याभी रथां अवथो याभिरर्वतस्ताभि॰गतो ३ मृ॰ याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वी
तिं प्र च दभीतिमावतं याभिर्ध्वसंतिं पुरुषंतिमावतं ताभि॰गतो ३ मृ॰ अप्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनी
षाम् अद्यूत्येवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ३ मृ॰ ततो ध्वर्युः सोपयो निष्ठतारू चितोय म्ने इत्युक्ते अरूरुचदुषसः इत्येता
मभिष्टुयात्॥ अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः मायाविनो ममिरे अस्य मायया नृच
क्षसः पितरो गर्भमादधुः ३ मृ॰ द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः तन्नो मित्रो वरुणो मामहंता
मदितिः सिंधुः पृथिवी उत द्यौः ३ मृ॰ द्युतिर॰ भिस्र॰ यो ३ मृ॰ द्युभिरक्तु॰ गभिस्त्रेल तयो ३ प॰ इत्युक्त्वा मपात्रिः परिश्रा
यमंतीज म्लनुपस्थष्यो निष्ठेत्॥ ततत अध्वर्युर्वेदोक्तेनापकाशानुवाकेन गर्भो देवानामित्यादिकेन सार्द्धं कंडि
काष्टकेन मा मा हिंसीरित्यंतेन महावीरं पुरस्तान्नंतुर्यात्॥ अत्र होता स्म ध्वर्यवो वा वयं सेत मनुवाकं॥ ॥तथा वा
सूत्रायतस्त्वं॥ ॥समुद्राय्येन तमध्वर्युर्वा वावयंतीति॥ सोत्र प्रदर्श्यते॥ गर्भो देवानां पिता मतीनां पतिः प्रजानां॥ राम
सं देवो देवेन सवित्रा गत सं सूर्येण रोचते॥१॥ समग्निरग्निना गत सं दैवेन सवित्रा सं सूर्येणारोचिष्ट स्वाहा सम २९

ग्निस्तपसागत सं दैव्येन सवित्रा सं सूर्येणारूरुचत॥२॥ धर्ता दिवो विभाति तपसस्पृथिव्यां धर्ता देवो देवानाम
मर्त्यस्तपोजाः वाचमस्मे नियच्छ देवायुवं॥३॥ अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरंतं स सध्री
चीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वंतः॥४॥ विश्वासां भुवां पते विश्वस्य मनसस्पते विश्वस्य वचसस्पते स
र्वस्य वचसस्पते देवश्रुत्त्वं देव घर्म देवो देवान्पाह्यत्र प्रावीरनु वां देववीतये मधु माध्वीभ्यां मधु माधूचीभ्यां॥५॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ऊर्ध्वो अध्वरं दिवि देवेषु धेहि॥६॥ पिता नोसि पिता नो बोधि नमस्ते अस्तु मा मा हिंसीः
॥ इत्यपकाशानुवाकः॥ ॥तेन महावीरमुपस्थाय पुनर्मदंतीरुपस्पृश्य यथासनमुपविशति॥ अत्र उपवि
शनीयेकवचनात् ब्रह्मयजमानयोः पश्चान्निवृत्तिरिति केचित्॥ षड्पतिष्ठंत इति शतपथश्रुतेः षड्हरा
स्य यजमाना घर्मोपयुक्ताः सर्वे ऋत्विज उपतिष्ठंत इत्येवं परार्थत्वाद्ब्रह्मयजमानयोरपि उपस्थानं भवती
ति वदंस्प्रदाय॥ ततोध्वर्युर्गार्हपत्यसमीपे गच्छति इड एहि अदित एहि सरस्वत्येहीति दोहनार्थं गामाहू
य माता यां होपविष्ट एवमुपहूयेत्येतमभिष्टुयात्॥ त्रिः॥ उपहूयेसुदुघां धेनुमेतां सुहस्तो गोधुगुत दोहदेनां श्रे
ष्ठं सवं सविता साविषन्नोभीद्धो घर्मस्तदु षु प्रवोचो ३ मृ॰ उपहूय॰ देनां श्रेष्ठं॰ वोचो ३ षा॰ उपदेनो श्रेष्ठं॰ वोचो
३ मृ॰ ततस्तामागच्छंतीं गां हिंकृण्वती त्यभिष्टुयात्॥ हिंकृण्वती वसुपत्नी वसूनां वत्समिच्छंती मनसाभ्यागा

दे॰भा॰ ३०

दुहामश्विभ्यांपयोअघ्न्येयंसावर्द्धतांमहतेसौभगायोऽ३म्।ततोरशनयास्थूणायांबध्यमानायांगविअभित्वेत्य
भिष्टुयात्।अभित्वादेवसवितरीशानंवार्याणांसदावन्भागमीमहेऽ३म्।ततोगविस्ववत्संनिर्यमाणायांसमा
वत्संसंवत्सइत्येतेद्वेऋचावभिष्टुयात्॥समीवत्संनमातृभिःसृजतागयसाधनंदेवाव्यंमदमभिद्विशव
सोऽ३म्।संवत्सइवमातृभिरिन्दुर्हिन्वानोअज्यते।देवावीर्मदोमतिभिःपरिष्कृतोऽ३म्।ततोवत्सेस्तनम
भिपद्यमानेस्तनंगृह्णातिसतियस्तेस्तनइत्येतामभिष्टुयात्।यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापु
ष्यसिवार्याणियोरत्नधावसुविद्यःसुदत्रःसरस्वतितमिहधातवेकोऽ३म्।ततःस्तनादपनीयमानेवत्से
गौरमीमेदित्येतामभिष्टुयात्।गौरमीमेदनुवत्संमिषन्तंमूर्धानंहिङ्ङकृणोन्मातवाउ।सृक्वाणंघर्ममभिवावशा
नामिमातिमायुंपयतेपयोभिऽ३म्।ततोदोहनकर्त्रेप्रैषंधर्म्यांदोहनार्थंगोत्रिकटेउपविशतिसनितमसे
दुपसंजानानाउपेत्येतेद्वेअभिष्टुयात्।नमसेदुपसीदतदध्नेदभिश्रीणीतन।इन्दुमिन्द्रेदधातनोऽ३म्।संजाना
नाउपसीदन्नभिज्ञुपत्नीवन्तोनमस्यंनमस्यन्रिरिक्वांसस्तन्वःकृण्वतस्वाःसखासख्युर्निमिषिरक्षमाणाः
ऽ३म्।ततोघर्मदुघांदुह्यमानांपाणिविदोहेनगामित्येतयासज्ञाभिष्टुयात्।दोहेनगामुपशिक्षासखायंप्रबो राम
धयजरितर्जारमिन्द्रंकोशंनपूर्णंवसुनान्यृष्टमाच्यावयमघदेयायशूरोऽ३म्।दुहन्तिसप्तैकामुपद्वापञ्चसृज ३०

तेरश्मिनिष्क्रम्यपश्चांदिशमुदकंनयादित्संभवतिपश्चांदिशमुदकमाहरणार्थंगच्छतिप्रस्थयजमानोयत्नीवगच्छतिहोत्राप्रेषितोवत्सम
रोनक्रमेसाप्रेद्वेवत्वेत्येतस्त्रकंपंचदश्यंद्वादशीरहितन्नापउपधं।सवेदहर्म्मिमघमुक्तंमनुध्रुयात्॥तत्रप्रथममाषानवर्चःपठेत्।
उप्रदेवत्रान्ब्रह्मणेगातुरेतत्वयोअच्छामनःप्रयुक्ति।मंहीमित्रस्यवरुणस्यधासिंपृथुज्रयसेरीरधासुष्टुतिंओऽ३म्प्रदेवक्रिमंहीरुत्कोऽ३प्रवे-क्रि
मंही-सुष्टुतिओऽ३म्।अधुर्य्यवोहविष्यंतोहिभूताच्छायइन्द्रोशनतीरुशन्तः॥अवयाम्नहेअश्वराणःसुपर्णस्तमास्वधमर्त्रिमघासुहस्तोऽ३म्अध
र्यवोयइत्त।समुद्रमपांनयातंहविषायजध्वं।सवोददहर्म्मिमद्यमुक्तंतसेत्सोमंमधुमन्तसुनोतोऽ३योनिधिमोदीयसदस्वंतर्यवि
प्रासईलतेअर्धरेषु।अपोनयात्मधुमतीरपोदाअभिप्रिंद्रोवावृधेवीर्यायोऽ३याभिःसोमोमोदतेहर्षतेचकल्याणीभिर्युवतिभिर्नमर्त्य
ः॥ताअधुर्य्योअपाअछापरेहियदासिंचाओषधीभिःपुनीतोऽ३एवेयद्येनयुवतयोममंतयरीमुशन्तुशतीरेत्यछ।संजानानेनमनसासंचिकि
त्वेधुर्यवोविषणापश्चदेवोऽ३यावोदृतास्योअङ्करुणोदुलोकंपोदेवमव्याअभिशस्तेरमुंचतनत्स्माइन्द्रायमधुमन्तमर्म्मिंदेवमादनंप्रहि
णोतनायोऽ३म्प्राप्रहिनोतमधुमंतमूर्मिंगर्भोयोवःसिंधवोमध्वउत्सः॥घृतपृष्ठमीड्यमध्वरेष्वापोरेवतीःशृणुताहवंमेर्तंसिंधवो
मत्सरमिंद्रपानमूर्मिंद्रपानमूर्मिंप्रहेतयअपेइत्यर्धर्चःअर्धर्चेविरमेत्।ततोधर्य्युःऊर्णपञ्चगृह्णीतचतुर्गृहीतेनाप्याहुतोहूयमानायांम
दच्युतमित्येनेनसंधायहिनोतेत्येतकादशीपठेत्।मदच्युतमौशानंनभोजांपरित्रितंतंसुविचरंतमुष्णोऽ३हिनोतानोअध्वरेदेवयज्याहिनोत

प्रस्तरस्तनेपंथमानां॥ ततोध्वर्य्वादिभिर्देवयजनं प्रतिगृहीतास्तु एकधनाख्यकुंभस्थास्तु आनीयमानास्तु आवर्द्द ततीरित्येतां स्तुतस्य
दशमीन्त्रस्यचो गायत्र्यर्द्धेन संधायपठेत् त्रुतस्यपोगे विपधम्र धःस्रष्टी वरीर्भृतनास्त्यमायो २ आवर्द्द ततीस्वनु दिधा रागो
युवधोत्तनिषवेवरंतीः॥ अत्रार्द्धर्चे विरमेत्॥ तत एकधनाकुंभेषु दृश्यमानेषु शिष्टेनार्द्धर्चेनोत्तरां संधायपठेत्॥ कृषेजनिती भुवन
स्यपत्नी रपोवंदस्वसहृधः सयोनोऽ३ प्रतिपद्यो अदस्त्रमायती ध्यंतंयवोसिविस्रतीर्भिधूनि। अत्रापि विरामः॥ ततः सर्वेषु चात्वालसमीपे
आगतेष्वध्वर्युप्रमुखास्ता परिमेत्रावरुणचमसं वसतीवरी कुंभं चपरस्परं संस्पर्शयति। अथ यदा मैत्रावरुणचमसेवसतीवरीर्निनी
यमैत्रावरुणचमसाद् वसतीवरीकुंभेष्वानिनयति। तस्मिन् क्रियमाणे अध्वर्युभिर्मलसेत्येतेनार्द्धर्चेन समन्यायं तीत्यर्चं संधाय पठेत्॥२
तिभाष्यकारमतं चात्वालोकरणेवंतेरेष्वागतास्वप्सु पठेदित्यद्वृत्तिकारमतं। ब्राह्मणभाष्येपि पद्धतिकारमतेनैषां॥ अध्वर्युभिर्मिलनसामंति
राना इंद्रायसोमं सुषुतं भरंतो३ समन्यायंत्युपयंत्यन्याः समानमूर्वं नद्यः पृणंति। अत्रापि विरमेत्॥ ततो ध्वर्युर्होतृचमसे वसतीवरीर्नि
नयति। तास्वानीयमानास्तु तमस्त्रु विमित्यर्द्धर्चेनायोनदेवीरित्येतां संधायपठेत्॥ तमू शुचिं शुचयो दीदिवांसमपां नपातं परि तस्थुरा
पो३ आपो नदेवीरुपयंति होत्रियमवः पश्यंति वितंतं यथा रजः॥ ततो हविर्धानं प्रत्येकधनादिष्वास्थानीयमानासु प्राचेरित्यर्द्धर्चे
नाधेनवइत्येतां संधायसकृलाम्नेचं पठित्वाम कारांत प्रणवेनावस्येत्॥ प्राचैर्द्दवासः प्रणयंति देवयुं ब्रह्मप्रियं जोषयंतेवराइवोऽ३ आ

धेनवः पयसा तत्स्वर्यादीभ्रमर्द्दतीरुपनोयंतु मध्वा। महो रायेबृहतीः सप्तविप्रो मयोभुवो जरिता जोहवीतो३ म्॥ ततोध्वर्युर्होतारं पृच्छति अ
ध्वर्य्यवेषीरपा३इति स्तुतांतेन त्रिमध्ये शानवुचतुर्मीत्रायाज्ञिकी स्तुतिरिति कल्पवचनाच्चतुर्मात्रे रास्तुतेन भाव्यमिति कथं विमात्र
तेति चेत्॥ नाप्रत्याख्यासामदति यज्ञाधिकारेऽनुवर्तमाने गपिद्युलयोत्तिकीतिवचनातिरेकात् आम्राय पादेस्वतिगदोक्ता यायेत
प्रयुज्यमानायाम्र विप्लुते त्रिमात्रेत्रेवा। अत्र चाध्वर्युर्होता संमुखस्तिष्ठति ततः पठेत्॥ अथाध्वर्युर्होतारमम्याश्वत्यातिष्ठति तं होता
प्रत्येतीतिप्रति॥ ततोध्वर्युरुतेवनेनमुरितिप्रत्याह॥ ततो होतानिगदं तास्वध्वर्यवित्यादिमनुष्टुप्सर्वपठेत्॥ तास्वध्वर्यवाधावें
द्रायसोममूर्जस्वंतं पयस्वंतं मधुमंतं वृष्टिवनिं वसुमंतं रुद्रवंत आदित्यवंत ऋभुमंतं विभुमंतं वाजवंतं बृहस्पतिमंतं विश्वदेव्यावंतं य
स्य पीत्वामदइंद्रो वृत्रा णि जंघनत्प्रसजन्यानि तारिषों विपोथं त्यध्वभिज्ञामयो अध्वरीयतां॥ उतेमनंनमुरापो३ अस्मै प्रभरतेत्युपस्पर्शयाभि
र्वा स्वर्थः सहा इमामर्द्दाथिकाम्रेचमुक्त्वा उपोच्चायतत्तोध्वर्युमच्चात्याद्दक्षिणावृत्ता अदभिमुखः स्थित्वा तत्रैवतिष्ठन्नुत्तरामध्यर्द्धं वदेत्॥ त
तः सिंधुभ्यः कर्त्तं हविरित्येतेन सदसस्प्रयत्रे वदेत्यततस्योयोनमां च तुर्दशी में मा आमन्त्रितेतां संधायोत्तमपादे च दशमात्रमात्रायं इत्येतयाविः
परिष्यात्॥ ततो हिंवेत्वध्वरे॥ आपो देवीरुपद्रुपेय त्रगावः पिवंन्ति नः सिंधुभ्यः कर्त्वं हवी३ओवो एमाप्रमचैव तीन्ती विधन्याप्रध्ध्यवःसा
दयतासस्थायः॥ निबर्हिषिधत्तनसोम्यासोयां नप्रासंविदाना स्स एनोद्रआगमत्रपउशतीर्बर्हि रेदं न्यधरे अस्मदं देवयंतीः॥ अध्वर्यवःसु

द॰ भा॰ नुतेऽग्रपसोममम्नदुवः स्तुपाकादेवयज्योऽग्न्याम्मत्रायम्येतीः॥ अध्वर्युयः यज्ञोऽग्न्यागमत्रायस्येतीः। अध्वन्यज्योऽग्नम्॥ ततः सव्यावृत्या ध्रुवः स्थि
त्वायतउचेच्छितस्तस्मैवेभविशति। ततो अध्वर्युर्हविर्धानं प्रविश्य दक्षिणस्यानसोऽधस्तादुपरवदेशे आनडुहे अधिषवणचर्मणि सो
ममभिक्षुरान्धृति॥ तत्राध्वर्युरधिषवणचर्मण उत्तरभागे प्रत्यङ् उपविशति। यजमानोऽप्यधिषवणचर्मण उत्तरतोऽध्वर्युमपरेण। ब्रह्मा
तु दक्षिणतआसीत तां॥ ततोऽध्वर्युः सोमाभिषवं कृत्वा उपांशुनामकं ग्रहं गृहीत्वा जुहोति। ततः ब्रह्मा स्वस्थाने गत्वा तस्मै उपवि
शति। यजमानस्तं ग्रहमानं होत्रा प्राणं मे इत्यादिनाऽनुप्राणिति॥ बहिः प्रासं गमयेदित्यर्थः॥ प्राणं मे पाहि प्राणं मे जिन्व स्वाहा त्वा सुभ
व सूर्यायेति। तत उदितेन तथीमसंज्ञं ग्रहं गृहीत्वाऽध्वर्युर्जुहोति। तं होता व्यानं मे इत्यादिनाऽनुव्यानिति। प्राप्त समयं। प्रवेश्यतीत्यर्थः। अपा
नं मे पाह्यपानं जिन्व स्वाहा त्वा सुभव सूर्याय इति। ततो यजमानो जुहावि हविर्धानं प्रविश्य ग्रहणाय पात्राणां सादनं कुर्वन्ति होमेत्वसदे यो त
तोऽध्वर्युरैन्द्रवायवादीन् क्रमप्राप्तान् ग्रहान् गृह्णाति। ततः पुनर्ब्रह्मयजमानयोर्हविर्धानप्रवेशः। सर्वे ग्रहा गृहीत्वा स्थाप्य। अथ हवि
र्धानमध्यएवनिक्रमणयोच्छितमध्वर्युं प्रतिप्रस्थाता चारभते प्रतिप्रस्थातारं प्रस्तोता प्रस्तोतारमुद्गाता उद्गातारं प्रतिहर्तारं ब्रह्माणं यज
मानं मैत्रावरुणएवं समन्वारब्धा हविर्धानान्निष्क्रामन्ति। ततः सर्वे चात्वालं गत्वा मार्जनं कुर्वन्ति। आहवनीये ग्नौ तत्र सम्पन्नहस्ते नाध्वारं
भो दक्षिणेन होमः। अथवा होमान्तं तरमेव सर्वेषामन्वारंभः। मैत्रावरुणस्य नहोमः। मैत्रावरुणाम्पेति ध्यकरूत्तरकरणात् ब्रह्मणाप्ये राम॰

द्रप्सस्कन्दति द्रप्सश्चस्कन्देत्येताभ्यामृग्भ्यां द्रव्यं प्रचरणाभ्यामास्थाल्याः सरूपं सरूपं गृहीत्वा समिध्वेकं पवमानाः स्तावकत्विग्भ
व नीये। अस्य होमस्य विप्रुड्ढोम इति संज्ञा। यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणयोरुपस्थात्॥ अध्वर्योर्वा परि वा यः पवित्रा
त्तं ते जुहोमि मनसा वषट्कृतं स्वाहा॥ द्रप्सश्चस्कन्द पृथिवीमनुद्यामिमं च योनिमनु यश्च पूर्वः। समानं योनिमनु संचरन्तं द्र
प्सं जुहोम्यनु सप्त होत्राः स्वाहा इति॥ स्वाहाकारान्ते होममन्त्राणामिति सूत्रात् सर्वत्र होममन्त्रान्ते स्वाहाकारो भवति मनु संचरन्तं द्रप्सं जु
होम्यनु सप्त होत्राः स्वाहाकारान्ते होममन्त्राणामिति सूत्रात् सर्वत्र होममन्त्रान्ते स्वाहाकारो भवति॥ ततः सर्वे ऋत्विज आस्तावोप
विशनपर्यन्ते विच्छेदो यथा न भवति तथा गत्वा आस्तावे उपविशन्ति। आस्तावशब्देनाहवनीयादुत्तरेण चात्वालाद्दक्षिणतो निर्दिष्ट
मानस्थलविशेष उच्यते॥ ततः ब्रह्मा मैत्रावरुणश्च दक्षिणत उपविशतः। मैत्रावरुणः प्राङ्मुखः ब्रह्मणोपि तस्मीमुप्रवेशनं॥ ततः
प्रस्तोता ब्रह्मन्स्तोष्यामः प्रशास्तरित्युक्तो ब्रह्मा मैत्रावरुणोऽपि आयुष्मत्य ऋचो मागात तन्तुपाः सम्नः स्तुत देवस्य सवितुः प्रसवे। इति
जपित्वा। ओं स्तुध्वमिति ब्रूतः। एष एव सर्वेषां स्तोत्राणां प्रसवः। यजमानस्तु पवमानानामुपाप्यस्य अथम प्रस्तावान्तेऽसतो मा इत्यादि
मंत्रं जपति। असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय मृत्योर्मामृतंगमयेति। तत उद्गातारो बहिष्पवमानाख्ये
नोपास्मै गायता नर इति तृचेन स्तोत्रं कुर्वन्ति॥ ततो बहिष्पवमानसमाप्तौ यजमानो जपेत्। श्येनोऽसि पत्वा गायत्रछन्दा अनु

दे॰भा॰ त्वारभेस्वस्तिमासंपारयास्ययज्ञस्योदृचंइति।माध्यंदिनपवमानसमाप्तौस्तुपसोमासिपवत्वात्रिष्टुबुंद्राइत्याद्युक्ताअनुत्वारभइत्याद्
दर्कः॥अनुषंगःसमानः।पठनीयउक्थ्यः।आर्भवपवमानसमाप्तौसखायासिपवतानगर्वदाइत्युक्ताअनुत्वारभइत्यादिपूर्ववत्
ठेत्॥होताबर्हिष्पवनेष्कृतेतस्याध्नस्यएवउपयेत।उपहूतोदेवाअस्यसोमस्यपवमानस्यविचक्षणस्यभक्षउपमांदेवाहूयंताम्
स्यसोमस्यपवमानस्यविचक्षणस्यभक्षेमसात्वाभक्षयामिवाचात्वाभक्षयामिप्राणेनत्वाभक्षयामिचक्षुषात्वाभक्षयामिश्रोत्रेणा
त्वाभक्षयामिइति॥ ॥ततोध्वर्युराग्नीध्रेग्रहंहविर्द्धानंप्रविश्यग्रहणाति॥तत्रब्रह्मयजमानोयथान्यायमुपविशतस्तस्मी।ततोग्निदेव
ताकःसवनीयःपशुर्भवति।इंद्राग्नीदेवताकोवा।एकादशिनावा।तत्रैतादेवताः।अग्निः।सरस्वती।सोमः।पूषा।बृहस्पतिः।विश्वेदे
वाः।इंद्रः।मरुतः।इंद्राग्नी।सविता।वरुणः।एतद्देवत्याएकादशकायुशवोभवंति॥ ॥अथाग्नेयस्यपशोःपद्धतिर्लिख्यते॥ ॥तत्रोपाप्र
पपरिव्ययणमेव।ब्रह्मयजमानयोःस्वस्थानेउपवेशनं।तत्राग्नीध्रीयमुपस्थिनेयोयूपोसमादिनासंस्कृतस्तस्मिन्नेवयूपेपूर्व
दिनेयथारशनयापरिव्ययणंकृतंतामूर्ध्वीकृत्वातस्याःस्थानेपुनःपरिव्ययणंकरोत्यध्वर्युः।तत्रपरिव्ययमाणायानुब्रूहीति
तिसंप्रेषितोहोतायुवासुवासाइत्यन्तयाऋचापरिदध्यात्॥युवासुवासाः॰मान॥तंधी॰यंतो३युवा॰नः।तं॰यंतो३युवा॰नः।तं॰धीरो३स्॥
आवत्स्या।ततोग्निमेथनं।तत्राभिता।देवसवितरित्यादियजेनयज्ञमित्यंतंपूर्ववत्॥ततएहिहोतरित्यामंत्रितोहोतातन्नराचात्वालोत्क राम॰

रोमविश्योत्तरवेदेःपश्चान्महावेदेर्बहिराक्रमणंकृत्वाग्नयेसमिध्यमानायेतिसंप्रेषितःकंप्रयथाग्नीषोमीयवत्कुर्यात्।
तत्रसप्तदशसामिधेन्यः।आवाहनं।आवहदेवान्यजमानाय।अग्निमग्नआवह।वनस्पतिमावह।इंद्रंवसुमंतमावह।इंद्र
द्रवंतमावह।इंद्रमादित्यवंतमृभुमंतंविभुमंतंवाजवंतंबृहस्पतिमंतंविश्वदेव्यावंतमावह।देवाआज्यपानित्यादिसमानं।
ततोध्वर्युसंप्रेषितोनंतंकृत्वापरामोरीतिमंत्रंजपित्वाप्रवृत्ताहुतीजुहोति॥तत्रमैत्रावरुणस्येत्यच्छावाकादीनांचात्वालोत्कर
वेतरप्रविश्यप्रवरणानुष्ठेयं।अग्निर्होतावास्तिरादियदध्वर्युकर्त्तकंवरणंतेनक्रमेणवक्तृमैत्रावरुणःपश्चात्तारव्यश्चाहुतीर्जुहोत्वा
पद्रस्यादिनासकृत्तसकृद्धीतेननुद्रुति।अच्छावाकस्यप्रवराभावात्प्रवृत्ताहुतिहोमः।अनुमित्रावरुणौप्रशास्तारौप्रशास्त्रादिति
कात्यायनसूत्रेदृष्टवचनेनाच्छावाकस्यापिद्वितीयस्यवरणमितिकर्कभाष्येव्याकृतत्वात्कथमच्छावाकस्यवरणाभावइतिचेत्।न।
उक्तिविरोधात्।उक्तोत्तरविरोधाद्युक्त्याद्वि।सवाइलायामुपहूतायामागतमतस्मान्नतस्यवरणमेइतिश्रुतेः॥मनुष्येनुस्पष्ट
मेवैकस्यवरणंस्मृतिर्नं।मित्रावरुणौप्रशास्तारौप्रशास्त्रादितिप्रशास्तारमिति।यच्चकर्केणादिवचनेनाच्छावाकोपिवृतइत्यु
क्तंतदभिप्रायंसएववेद।तस्मादच्छावाकस्यप्रवराभावात्प्रवृत्ताहुतिहोमइत्येवसैद्धांतिकवर्त्मसरणिरिति।नात्रभ्रांतिःकार्या।अ
स्यापायेनतुप्रवृत्ताहुतीर्जुहुयात्इतिवषट्कर्त्रोरेवच्छावाकादितिवक्ताच्छावाकस्यानुवादार्थवदरणानिषेधःस्मृतिसतःततैवंक्रमः।

दे॰भा॰

स्वं होता प्रवरस्यामास्यस्थात्याः सकृदाज्यं गृहीत्वाहवनीये जुहोति। जुष्टो वाचो भूयासं जुष्टो वाचस्पतये देवि वाग्यत्ते वाचो मधुम
त्तमं तस्मिन्नो अद्य धाः स्वाहा सरस्वत्यै। इति प्रथमां। नात्रान्ते स्वाहाकारः कृतत्वात्। पुरस्तात्स्वाहाकारेणेति चशब्दात्। ततो मैत्रावरुणः प्रवि
शेत्॥ ततः पुनः सकृदाज्यं गृहीत्वा द्वितीयमुत्तरामाहुतिं जुहुयात्। तत्र प्रजापतये इति मनसा संकल्पः॥ ततोऽध्वर्युः स्वेदोर्केन मं
त्रेण जुहोति। ततः प्रतिप्रस्थाताध्वर्युवत्॥ ततो मैत्रावरुणब्राह्मणाच्छंसिपोतारो होतृवत्॥ ततो नेष्टाध्वर्युवत्॥ अग्नीध्रपित
मेव॥ ततो यजमानो होतृवदेवं ततो मैत्रावरुणाः प्रवरता इति होमः। ततो मैत्रावरुणाः स्वयमेव सदर्द्विद्वितीयं वेदिं दंडमादाय होतुरग्रतः
स्थितो हविर्द्धानगृहाद्दक्षिणेनाग्नीध्रीयं दक्षिणेन गत्वा सर्वे यात्रासदः प्रपद्य धिष्ण्यानुत्तरेणोगत्वाध्वर्युवत्॥ ततो मैत्रावरु
णस्य धिष्ण्यस्य पश्चात्तिष्ठति। होतापि तद्वदेव गत्वा स्वस्य धिष्ण्यस्य पश्चादुत्वा ऐंद्रीमावृत्तमित्यादि कृत्वोपविश्य स्कणाराप्र
तमग्नीषोमीयवत्तत्तुगीता। ततः समिधः प्रेष्येत्युक्तो मैत्रावरुणो होता यक्षदग्निमित्याद्यान्दश प्रयाजप्रैषान्सर्ववदङ्कम
लिश्व पठेत्॥ होता चानुप्रैषं समिद्धो अग्न इत्याद्या दश आप्रीः पठेत्॥ ततः पर्यग्नये नुब्रूहीत्युक्तो मैत्रावरुणोऽग्निर्होता
न इति तिस्रो इत्यादि प्रथमां त्रिरुत्तमां॥ ततउपप्रेष्य होतर्हव्या देवेभ्य इत्युक्तो मैत्रावरुणो जेदग्निरित्युपप्रेषमाह। ततो होता देवा
इत्याद्यध्रिगुं पठेत्॥ तत्राशासानामेधपतये मेधं इति विशेषः। देवतैकमेधपतिरिभिक्तो मेधपतिशब्दो द्वितावाचकत्वेन नि राम॰

र्दीरितत्वात्तस्य हि तद्देवतायाः अग्निरुपायाः एकादेकवचनेनोहः। एवं सर्वत्रापि एकदेवत्ये पशौ मेधपतिशब्दो होतव्याः। प्रास्मा
अग्निं भरतेत्यादिपूर्ववत्॥ ततः स्तोकेभ्यो नुब्रूहीत्युक्तो मैत्रावरुणो जुषस्व सप्रथ इत्येकामस्य मिमं नो यज्ञमिति वसकलस्य क्रमः वा ह
त्रिः प्रथमां त्रिरुत्तमां। ततो मैत्रावरुणः स्वाहाकृतिः प्रैषः। होतुः सद्यो जात इति याज्या॥ ततो वाग्यमनमुभयोः। ततोऽध्वर्युणाग्नये छा
गस्य वपायै मेदसोऽनुब्रूहीति प्रेषितो मैत्रावरुणः अग्नेयतिव पायाः पुरोनुवाक्या हाग्नयेतपसुयथांशायेअस्माचिह्यानि देवयुना
नि विद्वान्। सुया ध्यस्यन्तु ह्व्याः रामे नो भूयिष्ठां ते नम उक्तिं विधेम। ततोऽग्नये छागस्य वपां मेदः प्रस्थितं प्रेष्येति प्रेषितो मैत्रावरुणः
प्रेषमाह। होता यक्षदग्निं छागस्य वपाया मेदसो जुषतां हविर्होतर्यजेति होताप्यग्ने हे भुवो यज्ञस्य रजसश्च नेता यत्रानियुद्भिः सचसे
शिवाभिः। दिवि मूर्द्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहं वौषट्। ततो यथाप्रपन्नं निष्क्रम्य चात्वाले इदमापः इति वे
न मार्जनं कुरुतो होतृमैत्रावरुणौ॥ ब्रह्मयजमानयोर्न मार्जनं॥ अपपवायातुवेदिके नेदमापः इति मंत्रेण। (पत्न्या) अपि मार्जनं। परि
व्ययणीयाद्विवमार्जनांते प्रातःसवनेयस्तु कर्म भवति। माध्यंदिने सवने पुरोडाशेन पशुकं कर्म भवति। अग्नेऽस्तनीयस्त्व
नो अन्नं एव द्विःसवने शुभकः सवनीय इति सुत्रकारिति। ततो होता मैत्रावरुणो च्छावाको ग्रावस्तुत्ब्रह्मा ब्राह्मणाच्छंसी पो
ता अग्नीध्रः सदस्यो यजमानश्च सुगपद्द्विसमा राज्ञविस्यान्विद्धिष्ण्यस्थानयी नुपस्थाय सदः प्रविशंति। तत्रैवं धिष्ण्योपस्थानं॥

दे॰भा॰ हविर्द्धानाग्रप्रदेशे तिष्ठंतो यत्नपत्न्यो यस्यानंतं तत्नी दक्षिणाग्रास्तत्र कुंभमुखाः कुर्वंति। नात्र प्राच्युदीच्याभिमुख्यनियमः॥ तत्र प्रथमं सम
हावेदिस्थमाहवनीयमुपतिष्ठंते। सम्राडसि कृशानो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा नमस्तेस्तु मा मा हिंसीः इति। ततस्त्मा
हवनीयेपोप्यमथित्वाऽनुप्रहृतोग्निः स संकल्पमात्रेणाध्यायं ततस्तमाहवनीयमेवोपतिष्ठंते। ॐ अपिशोसि दुवस्वान् इति। अत्र स
र्वेष्वपि मंत्रेषु रौद्रेणानीकेनेत्यादि मंत्रशेषस्य मा मा हिंसीरित्येतस्योदर्कोनुषंग इत्यर्थः॥ अप्यवानुषंगेण कर्तव्यः॥ यथाप
ठितैरेवोपस्थानं कर्तव्यं। ततोपरेणोत्तरवेदिं दक्षिणतोत्तरवेदिश्रोणेर्वेदिं हिरण्यवमानः स्तोत्रपादः। ॐ परिषद्योसि पवमानः इति। ततो देश
मुपतिष्ठंते। ततश्चात्वालमुपतिष्ठंते। ॐ प्रतक्वासि नभस्वान् इति। ततः शामित्रं। ॐ असंमृष्टोसि हव्यसूदन इति। ॐ समुद्रोसि विश्व
भराः इत्युत्करं। ततो दक्षिणातोभूत्वा। ॐ विभूरसि प्रवाहणः इत्याग्नीध्रीयं। ततस्त्वाग्नीध्रीयागारं प्रविशंति। तत्र प्रवेशात्पूर्वं
तस्य द्वारस्थूणाशाखाग्रे प्रोतायावलीनां चलिकां स्थूणाग्रेपरिवर्तमानामभिमृशंति। ॐ दिवस्तंभनमसि मा मा संताप्सीः इति।
ततो द्वारस्थूणायो हस्ताभ्यां युगपत्स्पर्शनं कुर्वंति। ॐ ऋतस्य द्वारौ मा मा संताप्तं इति। तत आग्नीध्रीयागारं प्रविश्य यजमान
प्रावस्तुत्स्वेभ्यो वर्जितः सर्वौकाः ऋत्विजश्चाग्निमुत्तरेणागच्छेयुः। यजमानप्रावस्तुतस्त्वास्तत्र मग्निं दक्षिणेनागच्छेयुः। ततः
सदसोग्रसदः प्रवेशार्हमार्गादुत्तरतो योऽद्वारकोप्रवेशनप्रदेशस्तमुपतिष्ठंते। ॐ मलिम्लुचोसि सगर इति। ततः सदोद्वारि स्थि राम॰

२५

त्वा होत्रधिष्ण्यमुपतिष्ठंते। ॐ वह्निरसि हव्यवाहनः इति। ततो मैत्रावरुणधिष्ण्यं। ॐ श्वात्रोसि प्रचेताः इति। ततो ब्राह्मणाच्छंसिधि
ष्ण्यं। ॐ तुथोसि विश्ववेदाः इति। ततः पोतृधिष्ण्यं। ॐ उशिगसि कविरसि इति। ततो नेष्टृधिष्ण्यं। ॐ अवस्युरसि दुव
स्वान् इति। ततोच्छावाकधिष्ण्यं। ॐ अंघारिरसि बंभारिः इति। ततोत्रैव स्थिता मार्जालीयमुपतिष्ठंते। अत्रैव देशे तिष्ठंत
ता॥ ॐ शुंध्यूरसि मार्जालीयः इति। ततो मैत्रावरुणधिष्ण्यात्पूर्वेण कृत्तं वर्तमानं ब्रह्मोपवेशनप्रदेशमुपतिष्ठंते। ॐ शुंध्यु
रसुपसद्यः इति। ततः औदुंबरीं। ॐ ऋतधामासि स्वर्ज्योतिः इति। ततः सदोग्रदेशं अंतर्बहिश्चानुवीक्ष्योपतिष्ठंते। ॐ समुद्रोसि
विश्वव्यचाः इति। तत उत्तरेण सदो गत्वा शालाद्वारि स्थिताः संतः प्रागामुखस्थमाहवनीयमुपतिष्ठंते। ॐ अजोस्येकपात् इति।
ततः प्राञ्च उत्तरेण गार्हपत्यमुपतिष्ठंते। ॐ अहिरसि बुध्न्यः इति। ततो व्रतश्रपणं दक्षिणाग्निमुपतिष्ठंते। ॐ अन्नादोस्य
न्नपतिः इति। ततः पुनरुत्तरेण सदो गत्वा सदसः पुरस्तात्तिष्ठंतः सर्वानुद्वर्त्तान् सर्वोत्क्रान् धिष्ण्यानुपतिष्ठंते। ॐ अग्नयः सगराः
सगराः स्थ सगरेणानाम्ना रौद्रेणानीकेन पात माग्नयः पिपृत मा नमो वोस्तु मा मा हिंसिष्ट इति। ततस्त्वादित्योपस्थानं। ॐ भुव
अंकूरुद्धेअंति मपंत्रो शोधः पमिंद्रस्य काम्यं। सत्रिमे धाम यासिषं इति। एवं सदः प्रवेशांतं त्वा मैत्रावरुणश्च ततयश्चत्वारो ऽग्रेण सर्वान्धिष्ण्यान् उत्तरेण क्रमेणागत्वा
स्वस्वस्वधिष्ण्यस्य पश्चादुपविशंति। ब्रह्मा तु मैत्रावरुणमौदुंबरींच दक्षिणेनागत्वा स्वस्थाने मंत्रेणोपविशेत्। यजमानस्तत्स्य ग्रावस्तुतश्च
सर्वान्धिष्ण्यानग्रेणागत्वा दक्षिणतः उपविशतः। अग्नीदस्तु धिष्ण्यमग्रेणोत्तरतो गत्वा स्वस्य धिष्ण्यस्य पश्चादुपविशति। ग्रावस्तुतः प्रयो

३६ तनाभावेपि अछावाकं परिहाप्येति वचनात् प्रविश्य संनिधौ तेन स्थातव्यं। इतउत्तरं मसमाप्ते सवने प्रयोजनवशेनापरया द्वारा न निर्गच्छेयुर्ये सदसि
प्रविष्टास्ते। यदि निर्गच्छंति तदा पूर्वद्वारैव। तत्र धिष्ण्यरहितानाम् ब्रह्मणां होतृमैत्रावरुणधिष्ण्ययोर्मध्ये विसंस्थितसंचरो न वाति। विसंस्थि
तसंचरो नाम विसंस्थिते असमाप्ते सवने संचरते स्मिन्निति। तेन धिष्ण्यसहितानां पूर्वोक्तधिष्ण्यावंतरायसंचरो यावत्सवनं परिसमाप्य
ते तावत् धिष्ण्यवतां प्रजा उत्तस्वधिष्ण्यादुत्तरभागे विसंस्थितसंचरः॥ अत्रयेऽधिष्ण्यतास्ते यदि स्वाधिष्ण्ययो द्वंचोगच्छंति तदा अग्नीध्री

दे.भा. ध्रुनोऽग्नधिपतिरसि स्वस्ति नोऽस्मिन्देवयाने पथि स्तात्॥ इति। ततो मैत्रावरुणप्रभृतयो धिष्ण्यवंतोऽछावाकं परिहाप्य प्र
र्वया द्वारा सदः प्रसर्पंति। तत्र प्रथमं प्रसर्पमाणाः सदस्योपर्यभिमर्शंतीत्युक्तवाद्विवस्पृष्टमसि मा मा संताप्सीरिति मं
त्रेणाग्नीध्रीयवद्दलीमुपरिवर्त्तमाना अभिमर्शंति। ततः कृतस्य द्वारो माऽसंताप्तमिति सुगपत्ते द्वारश्रूणे। ततो दक्षिणाधि
ष्ण्यादक्षिणाधिष्ण्यः पूर्वः प्रविशति। यथा प्रथमं मैत्रावरुणस्ततो होता ततो ब्राह्मणाछंसी। ततः पोता॥ अछावाकस्तु न प्रविश
ति अछावाकं परिहाप्येति वचनात्॥ आग्नीध्रश्चीध्रंगत्वा दक्षिणया द्वारा संमर्शनादि कृत्वा प्रविशेत्॥ ब्रह्मा तत्रैव सदो न
त्वापरया द्वारा सदः प्रविशेत्॥ यजमानस्सदस्यश्चावस्थानतः स्वपूर्वेये वद्वारा संमर्शनादि कृत्वा प्रविशंति। सर्वेऽपि वस्समा
णां मंत्रालपंत एव प्रविशंति। उं विश्वेदेवा अग्रतुमा प्रसर्पत। उं इंद्र निधातु स्वारणं त्रिवरूथं स्वस्तिमत्॥ उत्तदिष्यं छमघवन्नाष्ठम
त्यं यावयाद्विषुमेभ्यः॥ उं यतं इंद्रभयामहे ततो नो अभयं कृधि॥ मघवंत्वञ्चित्तवतन्न ऊतिभिर्विद्विषोविमृधोजहि॥ उं सदसस्पतिमद्भुतं॥ राम.
यस्य पश्चाद्धैर्यं यदि दक्षिणागच्छंति तदा मार्जालीयस्य पश्चाद्भवेन। येनैवमार्गेणागतास्तेनैव व्यावर्त्तमानाः अविलंबिताः प्रसाग प्रवि ३६
शंति। प्रातः सवनादूर्ध्वं सूमस्तोपस्थानप्रभृति तिनाग्नयः सगरा इत्यादिनाप्रसर्पणं भवति। रात्रिपर्यायेषु आश्विनेत्वादित्योपस्थानं न वि
धते। यत्रत्वादित्योपस्थानं प्राप्तं तत्रापि देववशान्मानुषाद्वाकालातिक्रमस्स्यादित्यस्तंगतेष्वादित्योपस्थानं भवत्येवेति रात्रिपर्या
यादौ निषेधः तानाचार्येण सूचितं॥ ७॥ इति श्री शांखायनपद्धतौ उत्तममालायां द्विवेदि श्री श्रीपतिपुत्र विरचितायां षष्ठोऽध्यायः समा
प्तः॥१